THE KASHMIR SERIES

OF

TEXTS AND STUDIES.

Kashmir Series of Texts and Studies.
No. XLVIII.

THE SVACCHANDA TANTRAM

WITH COMMENTARY

BY

KSHEMARĀJA.

EDITED WITH NOTES BY

PANḌIT MADHUSUDAN KAUL SHĀSTRĪ, M. A., M. O. L.

VIDYĀVĀRIDHI,

Superintendent Research Department,

JAMMU AND KASHMIR STATE,

SRINAGAR.

Published under the Authority of the Government of

His Highness Mahārājā

Sir HARISINGH BAHĀDUR,

K. C. I. E., K. C. V. O.,

MAHĀRĀJA OF JAMMU AND KASHMIR STATE.

Volume IV.

BOMBAY:

PRINTED AT THE 'NIRNAYA-SAGAR' PRESS.

1927.

श्रीसोमानन्दनाथप्रभृतिगुरुवरादिष्टसन्नीतिमार्गो
लब्ध्वा यत्रैव सम्यक्पटिमनि घटनामीश्वराद्वैतवादः ।
कश्मीरेभ्यः प्रसृत्य प्रकटपरिमलो रञ्जयन्सर्वदेश्यान्
देशेऽन्यस्मिन्नदृष्टो घुसृणविसरवत्सर्ववन्द्यत्वमाप ॥ १ ॥

तरत तरसा संसाराब्धिं विधत्त परे पदे
पदमविचलं नित्यालोकप्रमोदसुनिर्भरे ।
विमृशत शिवादिष्टाद्वैतावबोधसुधारसं
प्रसभविलसत्सद्युक्त्यान्तःसमुत्प्लवदायिनम् ॥ २ ॥

ॐ

काश्मीर-संस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ४८

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्यविवरणोपेतम् ।

श्रीभारतधर्ममार्तण्ड-कश्मीरमहाराज-

श्रीप्रतापसिंहवर-प्रतिष्ठापिते

प्रत्नविद्याप्रकाश-(रिसर्च) कार्यालये

तदध्यक्ष-पण्डित-मधुसूदन-शास्त्रिणा

उद्दिष्टकार्यालयस्थेतरपण्डितसहायेन संगृह्य,

संशोधन-पर्यायाङ्कनादिसंस्करणोत्तरं

पाश्चात्यविद्वत्परिषत्संमताधुनिकसुगमशुद्धरीत्युपन्यासादिसंस्कारैः परिष्कृत्य

मुम्बय्यां

'निर्णयसागर' मुद्रणालये मुद्रापयित्वा प्राकाश्यमुपनीतम् ।

(चतुर्थो भागः)

संवत् १९८३. काश्मीर-श्रीनगर ख्रैस्ताब्दः १९२७.

Printed by Ramchandra Yesu Shedge, at the 'Nirnaya-sagar' Press,
26-28, Kolbhat Lane, Bombay.

**Published by Pandit Madhusudan Kaul Shastri, M. A., M. O. L.
for the Research Department,
Jammu and Kashmir State, SRINAGAR.**

अथ

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमन्महामाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्य-
विवरणोपेतम् ।

(अष्टमः पटलः)

यस्य बोधमहाम्भोधेर्ब्रह्माद्या भुवनेश्वराः ।
अंशा मिता बुद्बुदवत्तं स्तुमः परभैरवम् ॥

'……अंशकांश्च निबोध मे ।' (७।३३०)

इति यत्पटलान्ते उपक्षिप्तं, तद्विभक्तुं श्रीभैरव उवाच

अंशकं षड्विधं देवि
कथयाम्यनुपूर्वशः ।

परस्य बोधभैरवस्य शक्तिभिः ब्राह्म्यादिभिरधिष्ठिता ब्रह्माद्यास्तथावभासिता अंशाः ततस्तदनुग्राह्या अपि तदंशा इत्युच्यन्ते। अतोऽंशानाराध्यत्वेन स्थितान् कायति अयं ब्रह्मांशोऽयं विष्णवंश इत्यादिक्रमेण यो वक्ष्यमाणो

भावस्वभावादिः, सोऽंशक इत्युच्यते । स च साधकं प्रति सिद्ध्यनुकूलत्वात् अल्पांशोऽंशक इत्यभिधीयते ॥

तमुद्दिशति

भावांशकः स्वभावांशः
पुष्पपातांश एव च ॥ १ ॥
मन्त्रांशकः स्मृतश्चान्य-
स्त्वंशकापादनं द्विधा ।

भावः सहजस्तत्तद्भक्तियुक्त आशयः । स्वभावस्तदनुगुणो व्यापारः । यस्तु पूर्वयुक्त्या बद्धनेत्रस्य पुष्पपातानुसारं निश्चीयते तन्मन्त्रवाच्यदेवतात्मा अनुष्ठातुं, स मन्त्रांशः । अंशकापादनमंशस्यानिरूपितस्यापि मन्त्रस्य वीरद्रव्यादिहोमेन साधकदीक्षाक्रमेण वा आराधकं प्रति क्रियते इति द्विरूपमिति षोडशांशकाः ॥

एषामाद्यस्य लक्षणमाह

देवानुस्मरणं भावः
सहजं तं विजानत ॥ २ ॥

अदत्तानुष्ठानस्यापि प्राग्जन्मवासनापरिपाकवशात् तत्तन्नियतदेवतानुस्मरणं यत्सहजं, स भावांशः ॥ २ ॥

द्वितीयमाह

स्वभावश्च भवेच्चेष्टा

प्रोक्तभावानुगुण एवमेव लिङ्गार्चनाद्यात्मा व्यापारः ॥

तं च

कथयाम्यनुपूर्वशः ।
ब्रह्मांशो वेदभक्तस्तु
रुद्रांशं च निबोध मे ॥ ३ ॥
रुद्रभक्तः सुशीलश्च
शिवशास्त्ररतः सदा ।
विष्ण्वंशो विष्णुभक्तश्च
चन्द्रांशः प्रियदर्शनः ॥ ४ ॥
सर्वदेवरतः शान्तो
यक्षांशो धनसंग्रही ।

लुब्धो गर्वितमृष्टाशी
वातांशश्चपलः स्मृतः ॥ ५ ॥
सर्पविस्रम्भगामी स्या-
न्नागांशो दीर्घशाय्यथ ।
दीर्घरोषः पूतिवक्त्रो
गुरुक्षीररुचिः सदा ॥ ६ ॥
गान्धर्वो गायनो नित्यं
शिवभक्तो वरानने ।
विद्याधरांशकः प्राणी
दैत्यांशो द्वेषणः स्मृतः ॥ ७ ॥
कामांशो रूपवांश्चैव
सुभगो गणिकाप्रियः ।
रक्षोंशः क्रूरनिस्त्रिंशो
देवद्वेषी द्विजेषु च ॥ ८ ॥
पिशाचांशश्छलान्वेषी
वासरे भीरुकातरः ।

अग्न्यंशः परुषस्तीव्र

उष्णादः पिङ्गलस्तथा ॥ ९ ॥

सवित्रंशश्च तेजस्वी

पूर्तधर्मरतः सदा ।

इष्टानि कुरुते नित्यं

दयालुः शिवभावितः ॥ १० ॥

पूतिवक्त्रो दुरामोदलालास्यः । विद्याधरांशस्य शिवभक्तत्वं शिवशास्त्रोक्तविधानेन गुटिकाञ्जनादिसिद्धिरसिकत्वम् । क्रूरो दारुणहृदयः । निस्त्रिंशो निर्घृणव्यापारः । परुषो वाचा । तीव्रः कर्मणा । पूर्तं वापीकूपादिकरणम् । इष्टं यज्ञः । स्पष्टमन्यत् ॥ १० ॥

ये च यदंशास्तेषामेते ब्रह्मादयः

स्वसिद्धेः फलदाः सर्वे

स्वध्यानजपहोमतः ।

यस्य यावदैश्वर्यं, तावदेवासावाराधितः साधकेभ्यः प्रयच्छति । एवं चाभिदधदिदमाह—यत् परिमितांशस्य तत्तत्पदप्रापक

एव मन्त्रोदयः । स च येषां विशेषतः शास्त्रेषु नास्ति, तेषां प्रणव एव तन्नामनमस्कारयुक्तः ॥

यदा तु

'यो यत्राभिलषेद्भोगान्स तत्रैव नियोजितः ।
सिद्धिभाङ्मन्त्रसामर्थ्यात्............॥'

इत्युक्तस्थित्या इहत्यमन्त्रैः कृतदीक्षस्य साधकस्यैतन्मन्त्राराधनेनाराधितास्ते ते देवताविशेषाः, तदा सर्वे भैरवरूपा एवेति सर्वसिद्धिसाधका इत्याह

भैरवाङ्गसमालब्धाः
सर्वे देवा वरानने ॥ ११ ॥
भैरवास्तु स्मृताः सर्वे
सर्वसिद्धिफलप्रदाः ।

भैरवाङ्गसमालब्धा इत्युक्त्येदमाह—येषां कपालीशादिमन्त्राणां वक्त्राणि नोक्तानि, तेषामाराधकैर्नैष्कलवक्त्राङ्गानि प्रयोक्तव्यानि । कश्चिदत्र सर्वशब्दस्य द्विःस्थितस्य वाक्यद्वयविषयां योजनामसहमानः सर्वे देवा इत्यत्र सर्वदैवेति सर्वसिद्धिफलप्रदा इत्यत्र च सर्व-

कामसमन्विता इति पठित्वा एतन्मन्त्रदीक्षिताः साधकाः तदाराधनाद्भैरवा एव पूर्णसिद्धिभाजनं भवन्तीति व्याख्यातवान् । पुराणपुस्तकेषु त्वविगानेनाद्य एव पाठो दृश्यते ॥

एवं

स्वभावांशः समाख्यातः
साधकानां हिताय वै ॥ १२ ॥

साधकपदेन मुमुक्षूणां नायं नियम इत्यादिशति ॥ १२ ॥

पुष्पपातांशं लक्षयति

पुष्पपातवशान्नाम
कर्तव्यं सुरसुन्दरि ।

अनिश्चितभावस्वभावांशस्य बुभुक्षोर्बद्धनेत्रस्य पूजितसर्वावरणे भगवन्मण्डले पूर्वोक्तस्थित्या एकं पुष्पं क्षिपतो यत्र तत्पतेत्, तन्मन्त्रवाच्यदेवतानुसारेण नाम कार्यम् ॥

अतश्च ज्ञातांशकेनाचार्येणोपदिष्टतत्तत्त्वस्य

स मन्त्रः सिद्ध्यते तस्य
तमेवाराधयेद्यदि ॥ १३ ॥

शास्त्रोक्तविधानेनेत्यर्थात् ॥ १३ ॥

क्रमप्राप्तं मन्त्रांशकमधिकवक्तव्यत्वात् संप्रत्यनुक्त्वा, अंशकापादनं प्रस्तौति

अंशकापादनं देवि
कथयामि समासतः ।

कथमित्याह

वैहायसं ध्वज चैव
होमयेद्यस्तु साधकः ॥ १४ ॥
स मन्त्रः सिद्ध्यते तस्य
अर्यन्तोऽपि हि सुव्रते ।

वक्ष्यमाणस्थित्यार्यन्तोऽपि यो मन्त्रस्तदाराधनायैव वैहायसमिति उद्बद्धनरमांसं, ध्वजं च शूलारोपितनरमांसमष्टोत्तरशतं सहस्रं वा यथासंभवव्यवसायं यः साधक इत्याराधक आचार्यस्तत्प्रयुक्तोऽन्योऽपि वा साधको होमयेत्

जुहुयात्, तस्यासावेवमाराधितः सिद्ध्यति साधनानुगुणो भवति ॥

यस्य तु प्रोक्तक्रमेणाविवेचितांशकोऽपि प्रभावातिशयश्रवणात् कश्चिन्मन्त्रः आरिराधयिषितो भवति, नच वीरद्रव्यक्रमे योग्यतास्ति, तस्यारिराधयिषितं पूजाहोमादिनादौ तर्पयित्वा प्राक्प्रोक्तसाधकदीक्षाभिषेकविधानेनैव तन्मन्त्रांशकत्वापादनं कर्तव्यमित्यभिदधत् द्वितीयमंशकापादनं लक्षयति

अनंशकोऽपि यो मन्त्रो
ज्ञातचिह्नैर्वरानने ॥ १५ ॥
तदा यागं पुरा कृत्वा
अग्नौ होमं तु कारयेत्।

प्रोक्तप्रकारैर्न परिच्छिन्न अंशक आराधकः शिष्यो यस्यासावनंशकः। यागहोमौ तं शिष्यं प्रति तस्य मन्त्रस्याभिमुखीकरणाय ॥

ततः

शिष्यस्य पूर्ववत्कर्म
कृत्वा तु विधिपूर्वकम् ॥ १६ ॥
पूर्णाहुतिप्रयोगेण
योजयेच्छाश्वते पदे ।

कर्मेति भगवदर्चादिपूर्वं साधकाभिषेकान्तं, योजयेदिति तमेव शिष्यं मन्त्रेण सह शाश्वत इति परमशिवपदे, साधकाभिमते च शाश्वतभोगप्रदे सदाशिवादिधाम्नि शाश्वतपदयोजनादेव चायमासादितवीर्योऽनंशकतामुत्सृज्य, सदंशकत्वमेति ॥

इत्थमासादितांशकोऽसौ
परतत्त्वमभिध्याय-
न्साधयेन्मनसेप्सितम् ॥ १७ ॥

एवमंशकापादनं द्विधोक्त्वा, मन्त्रांशकमाह

मन्त्रांशं गणयित्वा तु
गृह्णीयात्सुविचारितम् ।

मन्त्ररूपमंशमक्षरभेदक्रमेणांशीकृतं मन्त्रम् ॥ साधकस्य चानुरूपांशकरूपत्वादपि अंशेन

हीनमध्यसमुत्कृष्टं
कथयामि समासतः ॥ १८ ॥

तत्र

हीनं शत्रुं विजानीया-
न्मध्यमं साध्यरूपिणम् ।
सिद्धं चैव सुसिद्धं च
उत्तमं परिकीर्तितम् ॥ १९ ॥

कथमित्याह

मन्त्राक्षरं तु विश्लेष्य
मात्राबिन्दुसमन्वितम् ।
आत्मनामाक्षरं तद्व-
दधोभागेऽस्य योजयेत् ॥ २० ॥

'ॐ शिवाय नमः' इत्यादिके मन्त्रे ॐकारादि मन्त्राक्षरं मात्राभिरकारोकारादिभिर्बिन्दुना च समन्वितं विश्लेष्येति अकारोकारादिमात्रा बिन्दुं च मकारमात्राकल्पनया अस्य पृथक्कृत्य, एवं शिकारवाकाराभ्यामिकारमाकारं च विश्लेषयेत् । अकारमात्रा तूच्चारणार्थं, न

कुतश्चिद्विश्लेषयेत्प्रत्युत यतो वर्णान्मन्त्रान्तरं विश्लेषितं, तस्याकारमुच्चारणार्थं कल्पयेदन्यथा उच्चारायोगात्। एवमात्मनः शिष्यसंबन्धि यन्नाम विष्णुमित्रमित्यादिकं, तत एकैकमक्षरं तद्वत्प्रोक्तमात्राभेदेन विश्लेष्य,अस्येति विभक्तमन्त्रस्याधोभागे योजयेत्। तेन अउमशइवआयनम इति दशानामक्षराणामधोविभक्तानि विष्णुमित्रनामाक्षराणि वइषणउमइतरेति दद्यात्। यत्र मन्त्राक्षराणि बहूनि भवन्ति, तत्र नामाक्षराणि पुनः पुनर्योजयेदा मन्त्राक्षरसमाप्तिं योजयेत्॥ २०॥

एवं स्थिते सति

आत्मवर्णात्समारभ्य
यावन्मन्त्रार्णमागतम्।
यस्मिन्स निपतेद्देवि
तमाद्यं परिकल्पयेत्॥ २१॥

शिष्यनामाक्षरमेकैकमवधिं कृत्वा मातृकावर्णपाठक्रमेण गणनया एकैकनामाक्षरो-

र्ध्वस्थ एकैको मन्त्रवर्णो यावदागच्छति तावद्वक्ष्यमाणेन सिद्धसाध्यसुसिद्धारिभेदगणनेन यत्रैतदन्यतमे स नामवर्णो निपतेत्संयुज्येत, तमायमिति शुभाशुभसूचकं निश्चिनुयात् । यथोक्तं मया संग्रहे

'आयान्तीष्टेतरार्थाय भवन्त्यायास्तत······।'

इति ॥ २१ ॥

अत्र गणनोपायप्रदर्शनपूर्वमायस्वरूपमादिशति

रेखाङ्गुलिगतं तं तु
कथयामि समासतः ।

रेखोपलक्षिताङ्गुलीगतमङ्गुलिरेखासु कथितं तमायम् ॥

स च

पर्वणि प्रथमे सिद्धः
साध्यश्चैव द्वितीयके ॥ २२ ॥
तृतीये तु सुसिद्धः स्या-
दरिर्ज्ञेयश्चतुर्थके ।

अनेन क्रमेण नामाक्षराणि मन्त्राक्षरप्राप्तिं यावद्गणयित्वा आयं परीक्षेत ॥

तत्र

अरिसाध्यौ परित्यज्य
दातव्यश्चुम्बकेन तु ॥ २३ ॥
सिद्धरूपः सुसिद्धश्च
भुक्तिमुक्तिफलप्रदः ।

अरिसाध्ययोराद्यन्तस्थितयोर्बहलयोर्वा परित्यागः, सिद्धसुसिद्धयोस्तु स्वीकारः क्रमेण भुक्तिमुक्तिप्रदत्वात् । यथोक्तम्

'सिद्धान्ते सिध्यतेऽवश्यं साध्यान्ते कृच्छ्रसाधनः ।
सुसिद्धः पूर्वसिद्धस्तु अर्यन्तो न प्रसिध्यति ॥'

इति । तथा

'एवं शुद्धौ कृतायां तु सुसिद्धोऽभ्यधिको यदि ।
सिद्धो न लभ्यते ग्राह्यमूर्तिः साध्येऽपि साधकः ॥'

इति । शुद्धौ कृतायामित्यंशकविषये निश्चितायां साध्येऽपि अधिके त्रिश्चतुर्वा आयाते सति मन्त्रमूर्तिराराध्यत्वेन ग्रहीतव्या इत्यत्रार्थः । इयं चांशकपरीक्षा एकाक्षरमालामन्त्रयोर्न कर्तव्या । यथोक्तम्

'एकाक्षरेषु कूटेषु मालामन्त्रेषु भामिनि ।
अंशकं न परीक्षेत परीक्षेतान्यमन्त्रगम् ॥'

इति, कूटेष्वद्वैततत्त्वेषु । अत एव

'मायां नेत्रे च देवेशि तथा द्वात्रिंशदक्षरे ।
न च तत्रारिशङ्का स्यात्·········॥'

इत्यप्यन्यत्रोक्तम् ॥

तदित्थंविचारात्

यस्त्वंशकविशुद्धः स्या-
द्भैरवोऽत्र वरानने ॥ २४ ॥
तं मध्यमस्थं संपूज्य
तत्स्थाने मध्यमं न्यसेत् ।

य इति कपालीशाद्यन्यतमः । मध्यमस्थमिति आराधनायां प्रधानीभूतत्वात् तत्स्थान इति तस्यावरणकक्ष्यास्थस्य कपालीशादेः पदे मध्यममिति श्रीस्वच्छन्दमयं तुर्यादिरूपतया परीक्ष्येति दर्शितम् ॥

अथ कथं श्रीस्वच्छन्दनाथस्य परिवारं प्रति परिवारतया न्यास इत्याशङ्कां शमयितुमाह

यतः सर्वगतो देवः
सर्वेष्वन्तर्गतः स्मृतः ॥ २५ ॥
तत्सिद्धिमुक्तिदातासौ
न वर्णाः परमार्थतः ।

यः सर्वगतो व्यापको देवः क्रीडादिशीलः चिदानन्दघनः श्रीस्वच्छन्दभट्टारकः सर्वेषु कपालीशादिषु प्रपञ्चव्याप्त्यावस्थितेषु अन्तर्गतः परमार्थरूपो यतः, तत्तस्मात् स एव तत्तत्कपालीशाद्यात्मना स्मृतः साधकस्यांशकशुद्ध्या सिद्धिमभेदव्याप्त्या च मुक्तिं ददाति परमार्थतः, नतु व्याप्तिज्ञानशून्या वर्णाः किंचित्कुर्वन्ति । उक्तं हि प्राक्

'अक्षरेषु कुतो मोक्षः··················।' (७।२३८)

इति तेन स्वस्यावरणभेदस्यान्यथाकल्पनेऽपि न तत्त्वभूमेः काचिन्म्लानिः ॥

तदिदमंशकविचारान्ते प्रसङ्गायातं वस्तु

कथितं सरहस्यं ते
गुह्याद्गुह्यतरं परम् ॥ २६ ॥

अथ यत् कथितमित्युक्तं, तत्प्रमाणीकर्तुं परमशिवात् प्रभृति गुरुपारम्पर्येणेदं रहस्यं तन्त्रमवतीर्णमिति दर्शयन् परादि दिव्यान्तं संबन्धषट्कं प्रदर्शयति

अतस्तन्त्रावतारार्थं
कथयामि समासतः ।

तत्र

अदृष्टविग्रहायातं
शिवात्परमकारणात् ॥ २७ ॥
ध्वनिरूपं सुसूक्ष्मं तु
सुशुद्धं सुप्रभान्वितम् ।
तदेवापररूपेण
शिवेन परमात्मना ॥ २८ ॥
मन्त्रसिंहासनस्थेन
पञ्चमन्त्रमहात्मना ।
पुरुषार्थं विचार्याशु
साधनानि पृथक् पृथक् ॥२९॥

लौकिकादिशिवान्तानि
परापरविभूतये ।
तदनुग्रहयोग्यानां
स्वे स्वे विषयगोचरे ॥ ३० ॥
अनुष्टुप्छन्दसा बद्धं
कोट्यर्बुदसहस्रधा ।

शिवात् परमाद्वयप्रथात्मकश्रेयोरूपात् परमकारणात् शिवान्तानां कारणानां सर्वेषां स्वभित्तावाभासकात्, अत एवादृष्टः परद्रष्ट्रेकरूपो विग्रहः स्वरूपं यस्य तस्मात्, भिन्नमेतत्पदं छान्दसेन पञ्चम्यात्वादेशेन, अथच तस्मिंस्तद्रूपमेवायातं प्रसरणस्फुरणं यस्य तद्ध्वनिरूपं नादामर्शात्मकं सुसूक्ष्ममप्रमेयं विश्वव्यापकं च, अकारादिकलाकलितत्वाभावात् सुशुद्धं, सुप्रभान्वितं महाज्ञानरूपं यत्तदेवापररूपेणेत्यनाश्रितभट्टारकाख्येन शिवेन दण्डवक्रभङ्ग्यवस्थितसद्योजातपञ्चमहामन्त्रशरीरे पृथक् पृथगनुग्राह्यानुसारं साधनान्यनुष्ठानानि लौकिकादिशिवान्तानि विचार्य तत्तत्सिद्धिसाधनार्थम-

परस्पेणैव स्थूलेन वेदादिरहस्यान्ततत्तत्स्रोतोभेदोद्भूतनानाशास्त्ररूपमनन्तग्रन्थसंदर्भात्मकं निबद्धम्। मन्त्रसिंहासनस्थेन सार्धत्रिकोटिमन्त्राधिपतिनेत्यनेनैव शास्त्रानन्त्यस्यावकाशो दत्तः। पञ्चमन्त्रमहात्मनेत्यनेन श्रीकण्ठीयसंहिताद्युक्तनानास्रोतोभेदः सूचितः। तत्र

'अदृष्टविग्रहाच्छान्ताच्छिवात्परमकारणात्।
ज्ञानरूपं विनिष्क्रान्तमनवच्छदनं महत्॥'

इत्यादिना नादस्वरूपं निरूप्य

'ततो जातमिदं सर्वं चतुर्वर्गफलप्रदम्॥'

इत्युक्त्वा स्रोतोभेदेन नानाशास्त्रप्रपञ्चोदयः प्रदर्शितः। तदेवेत्यादिना आबद्धमित्यन्तेन तत्तदनुग्राह्याशयानुसारेण भिन्नभिन्नफलान्यपि शास्त्राणि वस्तुतो वाक्यैकवाक्यतया परिपूर्णाभिन्नविमर्शस्फाराण्यासूत्रितसमस्तभेदाभेदप्रपञ्चानीति तथाविधव्याप्तिज्ञं तत्त्वज्ञं प्रत्यभिन्नचिदानन्दघनतत्त्वविश्रान्तिपरमार्थान्येवेति ध्वनति। तदुक्तम्

'यतः शिवोद्भवं सर्वं शिवधामफलप्रदम्।'

इति॥

एवं परसंबन्धमूलतां शास्त्रप्रसरस्य प्रदर्श्य, संबन्धान्तरगोचरतामपि प्रदर्शयिष्यामीत्याशयेन परमशिवेनापीत्थमिदमुत्थाप्यत इत्याह

गुरुशिष्यपदे स्थित्वा
स्वयं देवः सदाशिवः ॥ ३१ ॥
पूर्वोत्तरपदैर्वाक्यै-
स्तन्त्रमाधारभेदतः ।
तज्ज्ञानमीश्वरेऽदात्त-
दीश्वरेण शिवेच्छया ॥ ३२ ॥
विद्यायाः कथितं पूर्वं
विद्येशेभ्यस्तथादरात् ।

देवः परवाक्शक्तिमयः शिवभट्टारक एव, सदाशिव इति गृहीततत्तद्भूमिकः, स्वयं गुरुशिष्यपदे स्थित्वेति प्रतिभाभुवि प्रष्टृप्रतिवक्तृभावासूत्रणेन परममहापश्यन्तीवाक्शक्त्यासूत्रितपूर्वोत्तरपदात्मकैर्वाक्यैरुपलक्षितं तन्त्रमशेषशास्त्रसंदर्भमयं तज्ज्ञानं चेश्वरेऽदादिति संक्रामितवान्। आधारभेदत इति ईश्वरात्मकमा-

धारभेदमाश्रित्य स्वयं तदात्मना स्थित्वा इत्यर्थः । तज्ज्ञानमीश्वरे दत्तमिति तु पाठः पूर्वश्लोकान्त आसूत्र्येति योजयित्वा तेन चेत्यनुषङ्गेण व्याख्येयः । इयता महत्संबन्धो दर्शितः । शिवेच्छया सदाशिवेच्छया–इत्यनेनानायातशक्तिपातो नोपदेश्यः इति ध्वनति । विद्याया इति

'अष्टवर्गविभिन्ना तु विद्या सा मातृका परा ।' (११।५५)

इति वक्ष्यमाणमातृकावाच्याया देव्याः तथा वेदनप्रधानत्वात् विद्याशब्दवाच्यस्याशेषस्य मन्त्रग्रामस्य, अनन्तभट्टारकादिभ्यश्च विद्येशेभ्यो मन्त्रचक्रवर्तिभ्य ईश्वरेण तन्त्रं तज्ज्ञानं च कथितं संक्रमणयुक्त्या विमर्शपदं नीतम् । आदरादिति भक्त्युल्लासप्रकर्षात् । यद्यपि भगवतो मातृका तदुत्थाश्च मन्त्राः परमेशवदभेदेनावभासिता विद्यातत्त्वधाम्नि तावदशेषविश्वाभेदव्याप्तिरत्र निमग्नेव स्थितेति तामुन्मज्जयितुमीश्वरेण विश्वानुजिघृक्षया ज्ञानसंक्रान्तिरत्र कर्तुमुपपन्नैव । इतः प्रभृत्यन्तरालसंबन्धः आसूत्रितः

'मयापि तव देवेशि साधिकारं समर्पितम् ।' (३६)
इत्येतावत्पर्यन्तो भविष्यति ॥

एवं पश्यन्तीप्रसरणपर्यन्तां शास्त्रस्थिति-मुक्त्वा, मध्यमाप्रसरणेनाह

मायानियतिपर्यन्तै-
स्तस्माद्रुद्रैरवापि तत् ॥ ३३ ॥

तस्मादिति विद्यातत्त्वचक्रवर्तिनोऽनन्तभट्टारकादित्यर्थात्, मायानियतिपर्यन्तैरिति मण्डलिप्रभृतिभिः कञ्चुकवासिभिश्च रुद्रैरवापीति संक्रमणयुक्त्यैव ॥ ३३ ॥

ततोऽनन्तरं तदेव ज्ञानं तथैव

श्रीकण्ठेनेश्वरात्प्राप्तं
ज्ञानं परमदुर्लभम् ।

अहं हि भगवानीश्वरात्मनः शिवस्य शिष्यो, मण्डल्याद्यास्त्वनन्तशिष्याः । अत्र मध्ये पुंस्तत्त्वाधिष्ठातारो रुद्रा बन्धहेतुतया स्थापिता इति तेषामेतज्ज्ञानशक्तिसंक्रान्तिर्न कृता ॥

ततोऽपि तथैव

तेनापि तदधः प्रोक्तं
रुद्राणामीश्वरेच्छया ॥ ३४ ॥
प्रधानाच्छतरुद्रान्तं
दीक्षयित्वा विधानतः ।
ममापि च पुरा दीक्षा
तथा चैवाभिषेचनम् ॥ ३५ ॥
श्रीकण्ठेन पुरा दत्तं
तन्त्रं सर्वार्थसाधकम् ।

यद्यपि गुणतत्त्वे श्रीकण्ठनाथः स्थितः, तथाप्यसौ शिवशिष्यत्वेन प्रभावातिशयवानिति स्वोर्ध्वस्थप्रकृतिवर्तिनः क्रोधाद्यष्टकस्य स्वाधारतत्त्वगतानां च शतरुद्रान्तानां रुद्राणामनुग्रहीता । ममापीति कैलासवासिनस्तन्त्रप्रवक्तुर्भगवत उमापतेरुक्तिः । तदित्थमनन्ताद्याः श्रीकण्ठश्चेश्वरभट्टारकात्मनः शिवस्य शिष्याः, मण्डलिनस्त्वनन्तशिष्याः, क्रोधादयः शतरुद्रान्ताः उमापतिश्च श्रीकण्ठशिष्या इत्यादिष्टं भगवता । तेन यत् खेटकनन्दनेन

'मण्डलिनः श्रीकण्ठः क्रोधाद्याः शतभवाः सवीरेशाः।
एते कलादियोगात्प्रकटीकृततद्दक्रियाः परेशेन ॥'
(त० सं० ३०)

इत्युक्तं, तद्यथोक्तानुसारं क्वचित्साक्षात् क्वचित्पारम्पर्येणेति व्याख्येयं, नत्वविशेषेण। दीक्षयित्वेति अभिषेचनं कृत्वेति च शाक्तसमावेशसंक्रमणयुक्त्या पूर्वं शांभवसमावेशयुक्त्यैव। एवं च नादीक्षितस्य ज्ञानग्रहणे, नाप्यनभिषिक्तस्य तद्दानेऽधिकार इत्यादिष्टं भवति॥

अथैतत्तन्त्रं च तज्ज्ञानं च संक्रमणयुक्त्यैव

मयापि तव देवेशि
साधिकारं समर्पितम् ॥ ३६ ॥

इतः प्रभृति वैखर्याः प्रसरः ॥ ३६ ॥

एवमियतान्तरालाख्यं संबन्धं प्रकटीकृत्य, दिव्यान्तमादिशति

त्वमपि स्कन्दरुद्रेभ्यो
ददस्व विधिपूर्वकम्।
ब्रह्मविष्ण्वन्द्रदेवानां
वसुमातृदिवाकृताम् ॥ ३७ ॥

लोके संगृह्य नागानां
यक्षाणां परमेश्वरि ।

विधिर्दीक्षाभिषेकरूपः ॥

दिव्यादिव्यसंबन्धमाह

कथयस्व ऋषीणां च

एवं च देव्या विश्वानुग्रहाधिकारार्पणेन भगवता महाकारुणिकत्वं परिपोषितम् ॥

अदिव्यं संबन्धमाह

ऋषिभ्यो मनुजेष्वपि ॥ ३८ ॥

कथयस्वेति स्थितम्। देवी एव हि पराशक्तिस्वभावा विश्वाधिष्ठात्री अनुजिघृक्षारससरसहृदया तत्तदाचार्यदेहमाविश्यानुग्रहं करोति। एवं चादिव्यसंबन्धपर्यंतः पर एव संबन्धः सर्वत्र प्रपततीत्यभिहितं भवति। तदुक्तं

'..............सर्वः परकलामयः ।
महानवान्तरो दिव्यो मिश्रोऽदिव्यश्च तत्परः ।'

इति त्रिकहृदये ॥ ३८ ॥

उपसंहरति

एवं तन्त्रवरं दिव्यं
सिद्धरत्नकरण्डकम् ।
त्वया गुप्ततरं कार्यं
न देयं यस्य कस्यचित् ॥३९॥

यद्यपि पूर्वोक्ते सर्वतन्त्रे तवाधिकारो दत्तस्तथापि यदेवं निर्णीतनिर्णेष्यमाणपटलगतरहस्यार्थपूर्णत्वात् वरमुत्कृष्टमिदं दक्षिणस्त्रोतःसमुद्भूतभैरवतन्त्रजातमध्ये प्रधानभूतं दिव्यं सर्वभोगापवर्गप्रदं तन्त्रं, तत्त्वया गूहनीयं ज्येष्ठाशक्तिपातवतामेव प्रकाश्यं, नेतरेषामिति शिवम् ॥ ३९ ॥

आ देवेभ्यः क्रमान्तं निखिलमिदमियच्छासनत्राणरूपं
विश्वं यत्संप्रसूतं परमशिवपदाल्लोकपर्यन्तमेतत् ।
शास्त्रं वाक्यैकवाक्यास्थितमिव विगलद्भेदविश्रान्तिलब्धस्वच्छस्वच्छन्दधामप्रथनपरमिदं स्तात्समग्रस्य जन्तोः ॥

इति श्रीस्वच्छन्दोद्योते
अंशकाधिकारोऽष्टमः पटलः समाप्तः ॥ ८ ॥

अथ

श्रीस्वच्छन्दतन्त्रम् ।

श्रीमन्महामाहेश्वराचार्यश्रीक्षेमराजकृतोद्द्योताख्य-
विवरणोपेतम् ।

(नवमः पटलः)

श्रीमन्निष्कलसद्भित्तावुट्टङ्क्य सकलस्थितिम् ।
विश्राम्यत्यकले तत्त्वे यस्तं भैरवमाश्रये ॥

साधकोद्देशेनाराध्यपञ्चप्रणवनिरूपणानन्तरं तदुपयोगिबहुप्रमेयगर्भं कालस्वरूपमभिधायांशकसतत्त्वमुक्तं प्रसङ्गात्तन्त्रावतारो दर्शितः । अथ विघ्नौघविघातेन झटित्यभीष्टसिद्धिसाधनं श्रीकोटराक्षविधानं रक्षाचक्रप्रपञ्चमप्रश्नितमपि अनुजिघृक्षया प्रतिपिपादयिषुः श्रीभैरव उवाच

अतः परं प्रवक्ष्यामि
रहस्यमिदमुत्तमम् ।

अतःशब्दो व्याख्यातक्रमसूचनाय । प्रकर्षेण अनुजिघृक्षादरेण वक्ष्यामि । उत्तमं रह-

स्यमिति सर्वविघ्नप्रशमनं झटित्यभीष्टसिद्धि-प्रदं च ॥

अत एव

यन्न कस्यचिदाख्यातं
तत्ते वक्ष्यामि सुव्रते ॥ १ ॥

शोभनं व्रतं परतत्त्वावहितत्वं यस्या इत्यामन्त्रणेन योग्यतमविरलशिष्यविषयत्वमस्यानुष्ठानस्येति ध्वनति, अतश्च योग्यदेवीव्यतिरेकेण नैतदन्यस्याप्युक्तम् ॥ १ ॥

एतदुद्घाटयति

महाभैरवदेवस्य
क्रीडमानस्य भामिनि ।
सृष्टिसंहारकर्तारं
हृदयात्तु विनिर्गतः ॥ २ ॥

महाभैरवदेवः प्रथमपटलदर्शितनिर्वचनस्थित्या स्वच्छन्दनाथस्तस्य, निःशेषविघ्नप्रशमनसर्वसिद्धिसंपादनानुजिघृक्षात्मिकां क्रीडां ताच्छील्येन कुर्वतः, स्वस्वातन्त्र्यशक्त्यात्मकात्

हृदयात्, सृष्टिसंहारयोः कर्ता वक्ष्यमाणश्रीकोटराक्षनामा देवः, अरं शीघ्रं, विनिर्गतः समुच्छलित इत्यर्थः। अत एव भगवानघोरहृदय इत्युच्यते ॥ २ ॥

तं भगवन्तं दर्शयितुमाह

कल्पान्तवह्निवपुषं
प्रलयाम्बुदनिःस्वनम्।
तडित्पुञ्जनिभोद्दंष्ट्रं
जटाज्वालासमप्रभम् ॥ ३ ॥

चन्द्रसूर्याग्निनयनं
कोटराक्षं सुभीषणम्।
बृहद्वक्षःस्थलाभोगं
नागयज्ञोपवीतिनम् ॥ ४ ॥

स्फुरन्माणिक्यमुकुटं
सर्पकुण्डलभूषितम्।
सर्पहारकृताटोपं
सर्पकङ्कणनूपुरम् ॥ ५ ॥

सिंहचर्मपरीधानं
सर्पमेखलमण्डितम् ।
गजचर्मावृतपटं
शशाङ्ककृतशेखरम् ॥ ६ ॥
पञ्चवक्त्रं शवारूढं
दशबाहुं त्रिलोचनम् ।
कपालमालाभरणं
खड्गखेटकधारिणम् ॥ ७ ॥
पाशाङ्कुशधरं देवं
शरशार्ङ्गवितानितम् ।
कपालखट्वाङ्गधरं
वरदाभयपाणिकम् ॥ ८ ॥
भिन्नाञ्जनचयप्रख्यं
स्फुरिताधरभास्वरम् ।
ब्रह्मेन्द्रविष्णुनमितं
त्रिदशैरपि दुर्लभम् ॥ ९ ॥

सर्वमेतत् प्रागुक्तव्याख्याभिः व्याख्यातस-

तत्त्वम् । तडित्पुञ्जनिभे उद्धते दंष्ट्रे यस्य, जटानां ज्वालानां चासमा प्रभा दीप्तिर्यस्य, कोटरं कुहरं तदाकृतीन्यक्षीणि यस्य अनेन अन्तर्लक्ष्यतां बहिर्दृष्टित्वं च दर्शयति, सुष्ठु भीषणत्वं नाम्नैवोक्तम् । मेखलशब्दे तु ह्रस्वः ऐश्वरः । त्रिलोचनमिति प्रतिवक्रम् । अवतानितं मण्डलीकृतदोर्दण्डं, स्फुरिताधरत्वं निःशेषविघ्नभक्षणपरत्वेन ॥ ९ ॥

एतद्रूपमनुग्राह्यैरुपास्यमित्याह

एवं तं भैरवं देवं
स्वच्छन्दं परिकीर्तयेत् ।

स्वच्छन्दनाथमेव बहुरूपत्वादनेन सुभीषणेन विघ्नसंत्रासनेन रूपेण चिन्तयेदित्यर्थः ॥

अतश्च

स्मरणान्नाशयेद्देवः
पापसंघातमुल्बणम् ॥ १० ॥

ध्यायिनां व्याध्याद्युद्भावकप्राक्तनमहापापप्रशमनायैव तेनैवंविधं रूपं स्वेच्छया गृहीतम् ।

अतः स्मरणादेवोल्वणं दुष्टभोगदानायोन्मुखीभूतं पापसंघातं नाशयत्येव । अत एव चतुर्वक्त्रात् श्रीव्याधिभक्षभट्टारकादयमन्य एव देवो व्याध्याधिकारणभूतमहापापभक्षण इत्यवगतम् ॥ १० ॥

किंच

अस्य मन्त्रः पुराख्यातो
द्वात्रिंशाक्षरसंमितः ।
यस्तं भीषणरूपानुगुणतया
पञ्चप्रणवपूर्वान्तं
तत्र लीनं जपेन्मनुम् ॥ ११ ॥

प्राग्दर्शितसतत्त्वाः पञ्च प्रणवाः पूर्वान्तयोः यस्य तं, तत्रैव पञ्चप्रणवस्वरूपे लीनं विश्रान्तं, तद्व्याप्त्यर्थं तदाच्छुरितं चेमं, महामन्त्रं पूजान्ते जपावसरे जपेत् । अतश्चैवं वाच्यवाचकक्रमाभ्यां दीप्तत्वादघोरीश्वर्ययुक्तत्वात् भाविविशिष्टदेवतापरिवृतत्वेतराभ्यामस्य द्वात्रिंशदक्षरादन्यत्वमित्यनुष्ठानान्तरमेवैतत् ॥ ११ ॥

तदीदृशस्य

तस्य कल्पं प्रवक्ष्यामि
समासान्न तु विस्तरात्।

कल्प्यत आराध्यतेऽनेनेति कल्पः विधानम्॥

तमाह

पूर्वोक्तभूप्रदेशे च
विशुद्धे शुभलक्षणे॥ १२॥
पुष्पप्रकरसंकीर्णे
गन्धधूपाधिवासिते।
तत्र मण्डलमालिख्य
पूर्वोक्तैर्वर्णकैः शुभैः॥ १३॥
एकहस्तं द्विहस्तं वा
चतुर्हस्ताष्टहस्तकम्।
सुसूत्रितं समं कृत्वा
चतुरस्रं समन्ततः॥ १४॥
पूर्ववत्साधयित्वा तु
दिग्भागांस्तु वरानने।

पूर्वोक्तैरिति

'धाम्ना तु रजसां पातः················।' (४।३५)

इति वाक्येन सूचितैः, वर्णकैः सिन्दूरादिभिः। गतार्थमन्यत् ॥

एतत्प्राक्तनमण्डलाद्विशिष्टं मण्डलमित्याह

चतुर्द्वारसमोपेत-
मष्टपत्रं सकर्णिकम् ।
मध्ये पद्मं समालिख्य
केसरैरुपलक्षितम् ॥ १५ ॥
द्वात्रिंशदक्षरं बाह्ये
चक्रमालिख्य शोभनम् ।
एवं सुसूत्रितं कृत्वा
बाह्ये चैव तु वर्तुलम् ॥ १६ ॥
चतुरस्रं तदासन्नं
बाह्ये वीथीं प्रकल्पयेत् ।
मध्यपद्मप्रमाणेन
द्वारं कल्प्येत पूर्ववत् ॥ १७ ॥

एवमिति चक्रपरीमाणानुसारेण, सुसूत्रितं

वर्तुलं भ्रमं कृत्वा, तस्यासन्नं च चतुरस्रं कृत्वा वीथीं प्रकल्पयेत् । तद्बाह्येऽन्तःपद्मक्षेत्रमानं कण्ठकपोलशोभोपशोभाढ्यं चतसृषु दिक्षु द्वारचतुष्टयं कल्पयेत् ॥ १७ ॥

अथ निष्पन्ने मण्डले साधकः

भस्मोद्धूलितदेहस्तु
मुद्रालंकारभूषितः ।
केशयज्ञोपवीती च
दिग्वासाः संयतेन्द्रियः ॥१८॥
शंखार्घपात्रहस्तस्तु
सकलीकृतविग्रहः ।
परितोऽस्त्रं प्रविन्यस्य
भैरवं पूजयेत्प्रिये ॥ १९ ॥
प्रणवासनसंस्थं तु

भस्मोद्धूलितत्वादिना साधकस्य मन्त्राराधनावसरे महाव्रतित्वमुक्तमत एव परभैरवानुकारित्वेनापि तदभिमानिनो विघ्ना नश्यन्ति । भाव्यस्यात्र जलस्नानादि नोक्तं, दिग्वासाः तद-

न्यस्य यत्संयमनाशयेनैव कौपीनग्रहणात्? श-ङ्कमत्र प्रकरणसामर्थ्यान्महाशङ्कम्। परितोऽस्त्रं सर्वतोऽस्त्रप्राकारम् । प्रणवासनस्थत्वं प्राग्वत् ॥

कथं पूजयेत् कं च भैरवमित्याह

मूर्तिं हंसाक्षरेण तु ।
तमेव सकलं देवं
स्वच्छन्दं परमेश्वरम् ॥ २० ॥

मूर्तिं हंसाक्षरेणेति पूर्वोक्तेन चिन्मूर्तिमन्त्रेण द्वात्रिंशदक्षरेण च सकलमूर्तिरूपेण । तमेवेति पूर्वोक्तम् ॥ २० ॥

किमविशिष्टं, नेत्याह

यत्तत्परमनिर्भास-
मनामयमरूपकम् ।
तेन चावाहयेद्देवि

परमः सर्वोत्कृष्टो निर्भासो यस्य, अनामयं मायासंबन्धहरम्, अरूपकमनाकृति यत्पूर्वं निष्कलं तत्त्वमुक्तं, तेन प्रोक्तनीत्याद्यन्तस्थितेन सहितमावाहनमुद्रयावाहयेत् पूजनार्थमभिमुखीकुर्यात् ॥

किंच

हृच्छिरश्च शिखां तथा ॥ २१ ॥
वर्म नेत्रे तथास्त्रं च
तेनैव परिकल्पयेत् ।

तेनैवेति नैष्कलेन हृदाद्यङ्गमन्त्रेण, नतु प्राग्वत्सकलेनापि । ब्रह्मपञ्चकमन्त्राणां तु न सकलादिविभागोऽस्तीति प्राग्वत् तन्न्यासानन्तरं भगवदाकृतौ निष्कलाङ्गन्यासः ॥

इत्थं च निष्कलसकलात्मकैकरूपे भगवत्याह्वानसमये एव निष्कलसकलमन्त्रोच्चारात् निष्कलस्थानविहितपरमीकरणे न्यस्ते वक्त्रनैष्कलाङ्गविन्यासे कृते

स्थापनं संनिधानं च
निरोधार्घादिपूजनम् ॥ २२ ॥
सर्वं तेनैव कर्तव्य-
मुक्तानुक्तं वरानने ।

स्थापनादि सर्वं पूर्वप्रदर्शितमुद्राबन्धपूर्वं कर्तव्यम् । तेनैवेति निष्कलसंपुटितेन सकलेन ।

उक्तमिति स्थापनादि, अनुक्तं तु स्वागतपाद्या-चमनस्नानादि आत्मनिवेदनपर्यन्तम् ॥

इत्थं च

मध्यस्थं भैरवं पूज्य-
मङ्गषट्कसमन्वितम् ॥ २३ ॥

मध्यस्थमिति मध्यगतं, भैरवमिति भैरव-तेजः इत्यर्थः ॥ २३ ॥

किंचात्र पद्मबाह्ये द्वात्रिंशदरके चक्रे

ततः पत्रस्थिता देवी-
र्द्वात्रिंशार्णैर्निवेशयेत् ।
पूर्वारकात्समारभ्य
यावदन्ते व्यवस्थिताः ॥ २४ ॥

पत्रस्थिता इति अष्टपत्रस्य पद्मस्योक्तत्वात् प्रतिदिक्पत्रानुसारिस्थिताराचतुष्टये चक्रे संनि-वेशयेदिति द्वात्रिंशार्णैरिति तकारलोप ऐश्वरः, तेन द्वात्रिंशद्देवीः द्वात्रिंशतैव अर्णैः अर्थात् द्वात्रिंशद्वर्णसंबन्धिभिर्विभज्य निवेशयेत् ॥२४॥

तासां नामानि वक्ष्यामि
द्वात्रिंशत्परिसंख्यया ।

तानि मन्त्रस्थाक्षरस्फारसारतत्सदृशप्रथमनामाक्षररूपाणि निरूपयति

अरुणा घोषा देवी च
रेवती भोगदायिका ॥ २५ ॥
स्थापनी घोरसंज्ञा च
रक्षा भारभरेति च ।
घोररूपा रवा घोणा
रतिस्ताराथ रूपिणी ॥ २६ ॥
भयहानिस्तु चण्डा वै
सर्वदा च तथा वरा ।
तक्षकी च तथा शार्वी
बर्बरा सर्वगा तथा ॥ २७ ॥
रौद्री च भ्रामणी चैव
नागिनी च मनोहरा ।
स्तम्भनी रोषणी चैव
द्रावा रुद्रा प्रशासिनी ॥ २८ ॥
भयापहारिणी देवी
ज्ञेया द्वात्रिंश तत्क्रमात् ।

तत्क्रमादिति मन्त्रगताक्षरक्रमानुसारेणे-त्यर्थः । एवं चाभिदधन्न केवलं मन्त्रस्य पूर्वं निर्णीतवाक्यरूपा वीर्यव्याप्तिः यावद्वर्णानुसारेण प्रोक्तदेवताचक्रव्याप्तिमयत्वमपीत्यादिशति देवः ॥

आसां देवीनामावाहनादौ मन्त्रमाह

प्रणवादिस्ततो वर्णो
देवीनाम नतिस्तथा ॥ २९ ॥
सर्वासां तु विधिर्ह्येष
कर्तव्यो विधिवेदिना ।

वर्ण इति द्वात्रिंशदक्षरसंबन्धी क्रमेणैकैक इत्यर्थः । नाम इति चतुर्थ्यन्तमित्यर्थात् । विधिरिति पूजादिविषयो मन्त्रोच्चारणप्रकारः । विधिवेदिनेत्येष आवाहनादावामन्त्रणविभक्त्यन्तं नाम तथा तत्कर्मानुसारेण जातिप्रयोग इत्यनुमन्तव्यमिति ध्वनति ॥

अथासां देवीनां प्रतिदिशं चतसृणां पूर्वोक्तनीत्या भैरवीयप्रपञ्चव्याप्तितत्त्वलोकपालानुसारेण भैरवानुसारेण ध्यानं निर्दिशति

हेमाभं प्राक्चतुष्कं त-
दिन्द्रचापसमप्रभम् ॥ ३० ॥
चतुर्मुखं चतुर्बाहु
वज्रहस्तं सुगर्वितम् ।
कपालमालाभरणं
प्रहसत्तु विचिन्तयेत् ॥ ३१ ॥

प्राक्चतुष्कमिति पद्मप्राग्दलसंश्लिष्टानां चतुष्टयनिविष्टमरुणादिचतुष्कं तद्दिक्पतितुल्यत्वात् हेमप्रभं वज्रहस्तं च, इन्द्रचापसमप्रभमिति अन्तःस्फुरन्नानावर्णभास्वरम्, ऊर्ध्ववक्त्रस्य निष्प्रपञ्चत्वात् सिद्ध्यनुगुणता नास्तीति पञ्चवक्त्रशक्तिमदधिष्ठितमपि देवताचक्रं साधकसिद्ध्यानुगुण्येन गृहीतचतुर्मुखचतुर्भुजादिरूपं दर्शितम् । एकत्र दक्षहस्ते वज्रस्योक्तत्वादनुक्तमपि कपालखट्वाङ्गधारित्वमभयकरत्वमंशेन भैरवरूपानुकारादुक्तम्, अतश्च कपालमालाभरणत्वमपि संगतमेवेति तदनुसारेण प्रतिवक्त्रं त्रिनेत्रत्वमपि मन्तव्यम् । सुगर्वितत्वं प्रहसत्त्वं च निर्विघ्नसिद्धिदानानुगुण्येन

कियदेतद्वस्तु इत्याशयात् । एतच्चतुर्मुखत्वादि प्रहसितत्वान्तं सर्वत्र चतुष्केऽनुमन्तव्यं, तथा कपालखट्वाङ्गहस्तत्वादिकं च ॥ ३१ ॥

आग्नेयं रक्तवर्णाभं
शक्तिहस्तं सदा स्मरेत् ।
दण्डहस्तं स्मरेद्याम्यं
कृष्णवर्णं सुभीषणम् ॥ ३२ ॥
नीलमिन्दीवराभासं
नैर्ऋतं खड्गहस्तकम् ।
श्यामं वारुणदिग्भागे
पाशहस्तं विचिन्तयेत् ॥ ३३ ॥
धूम्रं सामीरदिग्भागे
ध्वजहस्तं सुचञ्चलम् ।
उत्तरं धवलं ज्ञेयं
गदाखेटकधारि च ॥ ३४ ॥
स्फटिकाभं तथैशान्यां
त्रिशूलायुधपाणिकम् ।

उत्तरस्मिन्देवीचतुष्टये खेटकधारित्वस्य स्वकण्ठेनोक्तत्वादभयपाणित्वं न ध्यातव्यम् । चतुर्मुखत्वादि सर्वमन्यत्प्राग्वत् ॥

अत्र ध्याने फलमाह

एवं ध्यानपरो यस्तु
चक्रमेतत्सदाभ्यसेत् ॥ ३५ ॥
वत्सरार्धाद्वरारोहे
तस्य सिद्धिस्त्रिधा भवेत् ।

उत्तममध्यमाधमरूपा ॥

एवं ध्यानसिद्धिमुक्त्वा, तस्यैव जपसिद्ध्युचितं क्षेत्रमादिशति

महेन्द्रे मलये सह्ये
पारियात्रेऽर्बुदे तथा ॥ ३६ ॥
विन्ध्ये श्रीपर्वते चैव
तथा कोलगिरौ प्रिये ।

एतान्यष्टौ सिद्ध्यनुगुणानि पर्वतस्थानानि ॥

किंच

गङ्गायमुनासंबाधे

संबाधः संकटं संमिश्रयोस्तयोः यावती प्रवाहभूमिः ॥

कुरुक्षेत्रे वरानने ॥ ३७ ॥
गङ्गाद्वारे प्रयागे च
ब्रह्मावर्ते समास्थितः ।

सरस्वतीचर्मण्वत्योरन्तरस्थो देशो ब्रह्मावर्तः ॥

अन्तर्वेद्यां सुपुण्यायां
नर्मदायां तथैव च ॥ ३८ ॥

गङ्गायमुनाप्रवाहयोर्मध्यमन्तर्वेदी । नर्मदायामपि तत्तटे ॥ ३८ ॥

किंच

सुस्निग्धदेशे भूभागे
पद्मषण्डैर्मनोरमे ।

पद्मषण्डैर्मनोरमो यः सुस्निग्धो देशस्तत्र भूभागे इति योजना ॥

किंच

येषु येषु प्रदेशेषु
स्वयंभूर्भगवाञ्छिवः ॥ ३९ ॥
तेषु स्थानेषु देवेशि
नियमस्थो जितेन्द्रियः ।
वाङ्निरुद्धः प्रसन्नात्मा
लक्षाक्षरजपे रतः ॥ ४० ॥
शाकभक्ष्यः फलाहारी
नीवाराद्यशने रतः ।
त्रिकालपूजानिरतोऽ-
थाग्निकार्यपरायणः ॥ ४१ ॥
भावितात्मा महासत्त्वो
रक्षायाश्च विधानवित् ।

यः

तस्य मन्त्रः प्रसिद्ध्येत्तु

सच

साधयेत्सचराचरम् ॥ ४२ ॥

स्वयंभूनामनुग्रहार्थमेवावतीर्णत्वात् तत्क्षेत्रस्य सातिशयं सिद्धिप्रदत्वम्। नियमस्थ इति शौचसंतोषतपःस्वाध्यायेश्वरप्रणिधाननिष्ठः । वाक् च निःशेषेण रुद्धा जपैकनिष्ठीकृता येन, प्रसन्नः त्यक्तसंगसंस्कार आत्मा मनो यस्य, लक्षाक्षरजपे रत इति प्राग्वत् द्वात्रिंशता लक्षैः सदशांशहोमैः, नतु यथान्ये अक्षरं मन्त्रस्तस्य लक्षेणैकेनेति अक्षरशब्दस्य मन्त्रवाचित्वाभावात्

'.........लक्षेणाक्षरसंख्यया ।' (६।५१)

इति प्राक्तनोक्त्यविशेषप्रतिभासनादेतस्या उक्तेः। नच षाण्मासिकस्य प्रोक्तचक्रध्यानस्य काचिदनुपपत्तिः तस्यैतज्जपसंख्याविधिं विना शुद्धस्यैव प्रोक्तफलहेतुत्वात् । नच ध्यानमात्रात्सिद्धिर्न भवतीति वाच्यमागमेषु शतशस्तत्प्रतिपादनात्, जपे तु तथोचितं ध्यानं न प्रत्याचक्ष्महे। यदि प्रोक्तचक्रध्यानं मन्त्रजपेऽङ्गं स्यात्, तच्चक्रदेवीनामपि जपनियममभिदध्यादित्यलम्। भावितात्मा आश्वस्तहृदयः, अत एव महासत्त्वः सावष्टम्भोऽत्यन्तशुद्धचित्तः। रक्षाया दिग्बन्धास्त्रप्राकारादिरूपायाः

चकारात् क्षेत्रपालबल्यादेः विधानविदिति-कर्तव्यताज्ञः ॥ ४२ ॥

यदुक्तं साधयेत्सचराचरमिति, तत्संक्षेपेण दर्शयन् भाविपटलप्रमेयवस्तु कटाक्षयति

कालाग्निर्नरकाश्चैव
पाताला हाटकेश्वरः ।
सप्तलोकं सब्रह्माण्डं
पञ्चाष्टकमतः परम् ॥ ४३ ॥
देवयोन्यष्टकं चैव
प्रधानपुरुषान्तकम् ।
नियतिः कालतत्त्वं च
रागो विद्या कला तथा ॥४४॥
माया विद्येश्वरं तत्त्वं
सादाख्यं शक्तिगोचरम् ।
सर्वं सिद्ध्यत्यनायासा-
न्मन्त्रराजप्रभावतः ॥ ४५ ॥

एतत्समनन्तरपटलनिर्णेष्यमाणं शक्तितत्त्वान्तं सर्वं साधकस्य वशे भवत्यतश्च शिवरूपः साधको जायते इति यावत् ॥ ४५ ॥

यत्र चेयद्विश्रमस्य वर्तते, तत्र दण्डापूपीय-न्यायो मितसिद्धीनां स्थित एवेत्याह

पूर्वोक्तं कर्म वै क्षिप्र-
मधमं मध्यमोत्तमम् ।
साधयेन्नात्र संदेहो
भैरवस्य वचो यथा ॥ ४६ ॥

अधमादि प्राग्वत् । मारणोच्चाटनवश्याकर्षणशान्तिकाप्यायनादि च यदधमादि कर्म पूर्वमुक्तं, तदपि यथोक्तद्रव्ययुक्तिसहकृतमयं मन्त्रराजः पूर्वोक्तन्यायेनैव जपलक्षेण सहोमेनाराधितः साधयतीति सिद्ध एवायम् । भैरवस्य यथैव वचस्तथा अत्राश्वस्तव्यम् । आश्वासो हि अकम्पः सिद्धिलिङ्गम् ॥ ४६ ॥

अथ योग्यतमसाधकविषयमेतदेव दर्शनं द्वात्रिंशद्देवताचक्रपरिवारं विना एकवीरं निरूपयितुमाह

अथैकवीरमाश्रित्य
अङ्गषट्कसमन्वितम् ।

जातियोगयुतं कृत्वा
अष्टपत्रे कुशेशये ॥ ४७ ॥

पूजयेत्पूर्वविधिना

एकमेव देवीपरिवाराद्यपरिवृतं वक्राङ्गषट्कमात्रसहितं, वीरं साधकानां मुक्तिपर्यवसिततत्तत्सिद्धिसाधनायोद्यतं, परमेश्वरं पूर्वोक्तविधिनेति 'भस्मोद्धूलितदेहस्तु' (९।१८) इत्यादिनोक्तेन सर्वेण क्रमेण पूर्वोक्त एव क्षेत्रे आराधनार्थं होमान्तेन विधिना पूजयेत् ॥

ततः प्रोक्तसंख्याकं जपं होमं च प्रतिज्ञाय, तत्संपत्त्यै

जपहोमार्चने रतः ।
ध्यायन्नेव महादेवि
स्वच्छन्दं परमेश्वरम् ॥ ४८ ॥
प्राप्नोति चिन्तितान्कामा-
न्देवि नास्त्यत्र संशयः ।

एवं साधकसिद्ध्यानुगुण्येनाराधनप्रकारानुक्त्वा रक्षाकल्पं प्रस्तावयितुमाह

अथ रक्षाविधानेषु
अघोरं योजयेद्यथा ॥ ४९ ॥
तथाहं कथयिष्यामि
तदेकाग्रमनाः शृणु ।

तत्र

द्वात्रिंशदरसंयुक्तं
चक्रमालिख्य भामिनि ॥ ५० ॥
नाभिकेसरसंयुक्तं
सुसमं तु वरानने ।
गोरोचनां तु संगृह्य
सिद्धालक्तकसंयुताम् ॥ ५१ ॥
दूर्वाकाण्डेन देवेशि
हरितेन समालिखेत् ।

सिद्धैः सिद्धार्थैरलक्तेन च मिश्रां गोरोचनां कृत्वा दूर्वाकाण्डेन नीलेन तत् चक्रम-

र्थात् भूर्जे लिखेत् । सिद्धालक्तकमलक्तकविशेष इत्यन्ये । सिद्धा भगवती चण्डिका, तत्पादाद्गृहीतेन कुङ्कुमेनेति त्वसत् ॥

अथास्य चक्रस्य

विद्याराजं कर्णिकास्थं
बिन्दुनादसमन्वितम् ॥ ५२ ॥
शक्त्यवसानं देवेशि
तस्मिन्साध्यं समालिखेत् ।
कषमध्ये वरारोहे
नयनाद्यन्तरोधितम् ॥ ५३ ॥
ईकारवेष्टितं कृत्वा

विद्याराजं नवात्ममन्त्रं, कर्णिकास्थमिति द्वात्रिंशदरचक्रनाभिगतकमलकर्णिकागतमिति यावत्, बिन्दुनादशक्तयोऽत्र लिपिक्रमेण लेखितव्याः । साध्यमिति तन्नाम, एवं चाभिदधद्वाच्यस्य वाचकाभिन्नत्वमीशेच्छाकृतमिति सूचयति । कषमध्य इति नवात्मसंबन्धिनः क्षकारस्य यौ ककारषकारौ तयोर्मध्य इति,

कादुत्तरस्य षस्य प्रथमभागे। नयनेन त्र्यक्षरेण पूर्वोक्तेन नेत्रमन्त्रेण, रोधितमिति संपुटीकृतम्। तत्र च नेत्रमन्त्राक्षराणामादावनुलोमक्रमः पश्चात्प्रतिलोमक्रमः इति संप्रदायः। ईकार-वेष्टितं कृत्वेति मायाबीजमालिख्य तदीकारेण नेत्रमन्त्रसंपुटितं तत्साध्यनाम त्रिवेष्टितं कष-मध्ये लिखेदित्यर्थः ॥

इत्थं कर्णिकायां लिखित्वा

अरकस्था निवेशयेत् ।

पूर्वोक्तदेवता देवि

पूर्वोक्ता अरुणाद्या यथोक्तैकैकमन्त्राक्षर-रूपाः साध्यान्ते भगवत्संमुखत्वेन, नतु तत्प-राङ्मुखतयेत्याम्नायोऽत्र ॥

अथ

तद्गर्भे साध्यमालिखेत् ॥ ५४ ॥

साध्यमिति तन्नाम ॥ ५४ ॥

कथं

भवगर्भे तु तत्कृत्वा

ईकाराख्येन वेष्टयेत् ।

त्रीन्वारांस्तु वरारोहे
ध्यानयोगसमाश्रितः ॥ ५५ ॥

भव इह प्रणवः तत्पूर्वस्य देवीमन्त्रस्योक्तत्वात्, तस्य गर्भे मध्ये, तदिति साध्यनाम कृत्वा पश्चादुपरिवर्तिमायाबीजसत्केनेकारेण प्राग्वद्वेष्टयेत् । तदीदृगितिकर्तव्यताविशेषितं साध्यनाम एकैकारानिविष्टदेवीमन्त्राक्षरमध्ये आलिखेदित्यर्थः । एवं घोशब्दस्य रेशब्दस्य अन्यस्य च प्रथमकुटिलभागात्मनि मध्ये एतत् लेखनीयम् । तथाभूतं चैतदेकैकं देवीमन्त्राक्षरं कर्णिकागतमन्त्रराजसंमुखं पूर्वादिक्रमेणारासु निवेशयेत् । ध्यानयोगसमाश्रित इति भगवतो देवतानां च स्वरूपं सिद्धिसमुचितयथोक्ताकारं ध्यात्वा तद्व्याप्तिं च भावयित्वा लिखेत् ॥५५॥

तदेवं लिखितमेतत्सर्वमेव चक्रम्
ऊर्ध्वे चैव तु संरोध्य
क्रौंकारेण वरानने ।

दिगष्टकेऽस्याष्टौ बहिः क्रौंकारा दातव्या इत्यर्थः ॥

अथैतत्

इन्दुनाच्छुरितं कृत्वा
पुष्पधूपैः प्रपूजयेत् ॥ ५६ ॥

इन्दुः कर्पूरम्। पूजनं मध्यमन्त्रात् प्रभृति सर्वमन्त्रैः यथास्थानं, यथालेखोत्पुंसनं न संपद्यते ॥ ५६ ॥

अथ

वेष्टयेच्चैव तद्भूर्ज-
मरन्ध्रं निर्व्रणं समम्।
पञ्चरङ्गकसूत्रेण
वेष्टयित्वा वरानने ॥ ५७ ॥
सिक्थेन मुटयेत्पश्चात्
क्षौद्रमध्ये निधापयेत्।

सिक्थं मधूच्छिष्टम्। क्षौद्रं माक्षिकं सर्वौषधिरससारभूतमिति तन्मध्ये स्थापनं साध्यस्याप्यायनाय ॥

अस्य रक्षाविधेः फलमाह

यदा मृत्युवशाघ्रातं
कालेन कलितं प्रिये ॥ ५८ ॥

अरिष्टचिह्नितं ज्ञात्वा
रक्षामेतां समालिखेत् ।
तस्य मृत्युर्न जायेत
इत्येवं भैरवोऽब्रवीत् ॥ ५९ ॥

यदाशब्दो भिन्नक्रमः समालिखेदित्यस्यादौ योज्यः । अस्य च पश्चात् तदेत्यध्याहार्यं, तेन कालाधिकारप्रोक्तैरन्यैर्वारिष्टैः चिह्नितं, तत एव च

'एकोत्तरं मृत्युशतमस्मिन्देहे प्रतिष्ठितम् ।
तत्रैकः कालमृत्युः स्याच्छेषास्त्वागन्तवः स्मृताः ॥'

इति स्थित्यागन्तुशतेनाघ्रातं कालमृत्युना च एकेन कलितं साध्यं ज्ञात्वा गुरुरिमां रक्षां यदा समालिखेत्, तदा तस्य मृत्युः कोऽपि न स्यादिति भगवतैवोक्तमेतदिति नात्र संशयितव्यं लिपिमात्रात् कथमेतद्भवतीति । यतः श्रीसर्ववीरश्रीभर्गशिखानिरूपितनीत्या लिपिरपि पराशक्तिप्रसररूपैव, अतो भगवतैवैवंप्रतिज्ञातत्वात् सत्यमेवैतन्मन्तव्यम् ॥ ५९ ॥

मृत्युरक्षणे प्रकारान्तरमाह

कपालीशस्य गर्भे तु
नाम यस्य समालिखेत् ।
भूर्जपत्रे वरारोहे
रोचनाया रसेन तु ॥ ६० ॥
ओंकारपुटमध्यस्थं
रोधितं नयनाक्षरैः ।
वौषड्जातिप्रयोगेण
तस्य मृत्युर्न जायते ॥ ६१ ॥

कपालीशः पूर्वोक्तः, तस्य गर्भे प्राग्वत्कषमध्ये। कीदृशं नाम । ओंकारपुटमध्यस्थमाद्यन्तयोरोंकारसंपुटीकृतं, तथाकृतं च सत्पूर्वोक्तैर्नयनाक्षरैः वौषड्जातिप्रयोगेण पश्चात्कृतेनोपलक्षितैः, रोधितमिति प्राग्वदनुलोमप्रतिलोमक्रमाभ्यामाद्यन्तयोः संपुटीकृतम् । दिग्विशेषानुपादानादष्टासु दिक्षु इति । अत्र च प्राग्वत् दूर्वाकाण्डलेखनपूजनादिक्षौद्रमध्यनिधापनपर्यन्तं सर्वमनुसर्तव्यम् ॥ ६१ ॥

एवं परिवारस्थभैरवाष्टकाद्यन्तस्थकपालीशविद्याराजाश्रयेण रक्षाविधानेन मृत्युजयमुक्त्वा, प्रसङ्गात् कर्मान्तरसिद्धिमपि यन्त्रक्रमेणादिशति देवः

शिख्याह्वेन तु देवेशि
साध्यनाम विदर्भयेत् ।
अनलार्णमधश्चोर्ध्वे
साध्यार्णेषु नियोजयेत् ॥६२॥

शिख्याह्वेन शिखिवाहनमन्त्रेण पूर्वोक्तेन, विदर्भयेदिति

'अभिधेयं भवेत्पूर्वं ततो मन्त्रः सकृद्भवेत् ।'

इति शास्त्रान्तरोक्तस्थित्यानुविन्यस्तमन्त्रं कुर्यात्, अनलार्णं रेफः तदेकैकत्र साध्यनामाक्षर ऊर्ध्वाधो नियोजयेत् । इत्थंविदर्भितमेतदाग्नेयमण्डलान्तस्थवायुमण्डलसंस्थितं कुर्यात्, आग्नेयमण्डलं त्रिकोणं तद्बहिर्वायुमण्डलं षट्कोणं वर्तुलम् ॥

एतच्च यस्य लिख्यते

तस्य वै जायते दाहः

वाय्वाध्माताग्निदीपितत्वादग्निवर्णमध्यगताक्षरत्वात् शिखिवाहनविदर्भितत्वाच्च ॥

किं शिखिवाहनविदर्भितमात्रमेव नामाग्नेयमण्डलान्तः क्रियते । न तन्मात्रमेव, किंतु

फट्काराद्यन्तरोधितम् ।

फट्कारान्तशिखिवाहनबीजविदर्भितमिति व्याख्यानमसत् तथा वाक्यार्थस्याभावात् ॥

एतल्लेखनानन्तरं च मन्त्रनाथं पूजयित्वा, एतच्चक्रमध्यगतमेव

ज्वलन्तं चिन्तयेत्साध्यं
दिनानां सप्तकं यदि ॥ ६३ ॥

ततस्तस्य

तत्क्षणाज्जायते दाहो
भैरवस्य वचो यथा ।

क्रोधराजप्रयोगेण मारणमाह

क्रोधराजनिरुद्धं तु
श्मशानपटमध्यगम् ॥ ६४ ॥

श्मशानाद्‌लिना लेख्यं
विषरक्तान्वितेन तु ।
यस्य नाम वरारोहे
हुंफट्कारविदर्भितम् ॥ ६५ ॥

मारयेतिसमायोगा-
त्क्रूरजातिसमन्वितम् ।
म्रियते सप्तरात्रेण
यो रक्षाभिः सुरक्षितः ॥ ६६ ॥

सोऽपीति शेषः । श्मशानाद्‌लिः श्मशानाङ्गारः, तेन प्रेतरक्तविषमिश्रेण मषीं कृत्वा, प्रेतपटखण्डे यस्य नाम हुंफट्कारविदर्भितमित्यन्ते विन्यस्य हुंफट्कारं कृत्वा, पश्चात्प्रागुक्तेन क्रोधराजेन निरुद्धमित्याद्यन्तरोधितं, ततोऽपि मारयेत्यनेन युक्तं, ततोऽपि क्रूरजात्या हुंफट् इत्यनेन समन्वितं लिख्यते, स रक्षाभी रक्षितोऽपि सप्तरात्रान्म्रियते । अत्र श्रीक्रोधराजरूपं शत्रुसंहारोचितमुग्रं चिन्त्यम् ॥ ६६ ॥

अथ शत्रोस्त्रासनाय विकरालप्रयोगमाह

विकरालो महादेवि
ऊर्ध्वाधःपाशसंस्थितः ।
साध्यनाम्नस्तु देवेशि
हुंफट्कारविदर्भिणः ॥ ६७ ॥
न क्षामयत्ययत्नेन

यस्य साध्यनाम्नः प्रोक्तयुक्त्या हुंफट्कारविदर्भितस्य विकरालाख्यो मन्त्रविशेषः चतुर्दिग्गतः प्रोक्तया मष्या लिख्यते, तस्यासावयत्नेन हेलयैव न क्षमते । क्षामयतीत्यैशः पाठः ॥

किमस्य न क्षमणमित्याह

तस्य शत्रोर्भयं भवेत् ।

अत्र च श्रीविकरालस्वरूपं मध्यस्थितस्य साध्यस्य चतसृषु दिक्षु त्रासकत्वेनोत्थितं चिन्तनीयम् ॥

अथ मन्मथप्रयोगं वशीकारायाह

मन्मथेन युतं कृत्वा
साध्यनाम वरानने ॥ ६८ ॥

ध्रुवाद्यं स्वाहयान्तेन
रक्तध्यानसमन्वितम् ।
अमुकोऽत्र वरारोहे
तद्दिशोऽभिमुखः स्थितः ॥६९॥

अमुकस्य वशं यातु
जपहोमौ समाचरेत् ।
सप्ताहाद्वशमायाति
इति शास्त्रस्य निश्चयः ॥ ७० ॥

पूर्वोक्तेन ह्व्ऊऔकारसमुदायात्मना सबिन्दुकेन पिण्डाक्षरेण मन्मथेन युक्तं यत्साध्यनाम, तदेव विभजति । अमुक इति अमुकस्य वशं यातु इत्येतदन्तं स्वाहया स्वाहाशब्देनान्तेनान्तस्थेन युतं कृत्वा च, ईदृशा प्रणवपूर्वेण मन्त्रेण रक्तध्यानसमन्वितामिति तं साध्यं रक्तं ध्यायन् तदवस्थितिदिगभिमुखः साधको यदि सप्ताहं जपं होमं च वशीकरणोचितैर्द्रव्यैः करोति, तदास्य साध्यो वशमायात्येवेत्यत्रार्थः ।

अत्र च यन्त्रप्रकरणादेतन्निश्चितं—यदेवंविधं मन्त्रं लिखित्वा संपूज्य जपहोमौ कार्यौ ॥ ७० ॥

मेघनादप्रयोगमुच्चाटनायाह

मेघनादावसाने तु
नाम यस्य समालिखेत्।
यकाराद्यन्तसंरुद्धं
मन्त्रं फड्द्वितयान्वितम् ॥७१॥
प्रेतस्थाने निधाप्यैत-
द्भैरवं तत्र पूजयेत्।
अक्षपुष्पैर्वरारोहे
तद्दिशोऽभिमुखः स्थितः ॥७२॥
तमुच्चाटयते क्षिप्रं
देवि नास्त्यत्र संशयः।

मेघनादो ह्र्यूऊबिन्दुसमुदायात्मा। यकारेति सविसर्गयकारसंपुटितमित्याम्नायः। एतदित्येवं लिखितं भूर्जे। निधाप्येति श्मशानभूम्यन्तर्गतं कृत्वा। तत्र ईदृशे भूर्जे। अक्षा

विभीतकाः । तदिति साध्यदिगभिमुखः । सप्ताहादिति स्थितमेव । स्पष्टमन्यत् ॥

सोमराजप्रयोगं विभवार्थं वशीकृत्यर्थं चाह

सोमराजेन देवेशि
आदिमध्यान्तसंयुतम् ॥ ७३ ॥
नाम यस्य समालिख्य
वषड्जातिसमन्वितम् ।
संनिधाप्य त्रिमधुरे
स्थापयेत्सुरसुन्दरि ॥ ७४ ॥
सप्तरात्रप्रयोगेण
त्रिकालाष्टशतेन च ।
असाध्यं साधयत्याशु
धनं च विपुलं लभेत् ॥ ७५ ॥

सोमराजो हुंकारः तेन, साध्यनाम आदिमध्यान्तसंबद्धं कृत्वेति नाम्न आदौ मध्येऽन्ते च त्रिः सोमराजं लेखित्वा, ततो वषडन्तं कृत्वा, तद्यन्त्रं संनिधाप्य पूजयित्वा सिक्थसंमु-

टितं क्षीरक्षौद्रशर्करापात्रसंपुटगं कृत्वा, सप्तदिनं यस्त्रिसंध्यं तथैव जपेदसावसाध्यं साधयितुमशक्यमपि साधयति वशीकरोति, श्रियं चाप्नोति ॥ ७५ ॥

पुनः प्रोक्तस्य क्रोधराजस्य जपहोमाभ्यां प्रयोगमुन्मादार्थमाह

पञ्चाङ्गेन पिशाचस्य
क्रोधराजावसानिकाम् ।
संज्ञां समुच्चरेद्देवि
क्रूरजातिसमन्विताम् ॥ ७६ ॥
उन्मत्तो जायते साध्यो
होमेन च जपेन च ।

पिशाचस्य विभीतकस्य मूलकाण्डपत्रकुसुमफलानि पञ्चाङ्गानि, तैर्मिलितं सप्ताहं प्रणवादिक्रोधराजहुंफडन्तं साध्यनामोच्चार्य, त्रिसंध्यमष्टोत्तरशतं यो जुहुयात्, तस्यासौ साध्यः शत्रुरुन्मत्तो भवति ॥

पुनरप्यनुग्रहहेवाकितया मृत्युजिद्विधिमाह

मृत्युञ्जयं प्रवक्ष्यामि
तमेकाग्रमनाः शृणु ॥ ७७ ॥

भूर्जपत्रं समादाय
नीरन्ध्रं निर्व्रणं समम् ।
तस्मिन्समालिखेत्पद्म-
मष्टपत्रं सकर्णिकम् ॥ ७८ ॥

तस्मिन्वै कर्णिकामध्ये
साध्यनाम समालिखेत् ।
संवेष्ट्याष्टौ दिशो देवि
स्वच्छन्देन कृशोदरि ॥ ७९ ॥

प्रणवेन तु संवेष्ट्य

स्वच्छन्देनेति सिद्धिप्रदानेन सकलेन साध्यनामाष्टौ दिशश्चक्रवदावरणक्रमेण संवेष्ट्य ततः प्रणवेन संवेष्ट्य कर्णिकामध्ये लिखेदिति योजना ॥

कर्णिकावत्प्रतिपत्रं लिखेदित्याह

पत्रेष्वेवं समालिखेत् ।

अष्टस्वपि ॥

किंच

पत्राष्टकेऽप्यघोरस्य

नामाधस्तात्समालिखेत् ॥८०॥

पत्रबाह्य आवरणक्रमेण व्योमरेखामित्यर्थः॥ एवं लिखित्वा प्राग्वत् कर्पूरादिना पूरयित्वा संपूज्य विज्ञप्त्यर्थं

वक्तव्यं देव संरक्ष

शरणं त्वामुपागतम् ।

साध्यमित्यर्थात्। तत एषा रक्षा सिक्थकादिना संवेष्ट्य पयसि क्षेप्या। पयसि क्षीरे निक्षिप्तमात्रैव सती साध्यस्य सद्योमृत्युविनाशिनीति कर्णिकायां लिखित्वा तल्लग्नेषु अष्टसु पत्रेषु एवमेव लिखेत् ॥

अथ शान्तिकमाह

आदौ त्र्यक्षरविन्यासं

स्वच्छन्दं तदनन्तरम् ॥ ८१ ॥

जन्मनाम तु साध्यस्य
अक्षरान्तरितं लिखेत्।
पुनस्त्र्यक्षरविन्यासं
वषडन्तं नियोजयेत् ॥ ८२ ॥

नेत्रमन्त्राक्षराणि त्रीणि चतुष्कलं च लिखित्वा जन्मसमयकृतं साध्यनामाक्षरैरिति अर्थादघोरस्तैरन्तरितमेकैकतदक्षरव्यवहितम्, 'अ देवदत्तः घो देवदत्तः' इत्यादिक्रमेण लिखित्वा पुनर्वषडन्तानि प्राग्वल्लिखेत् ॥ ८२ ॥

इमां च रक्षां संपूज्य
मुटित्वा सिक्थकेनैव
क्षीरमध्ये तु प्रक्षिपेत्।
इत्थं च साध्यस्य
जायते परमा शान्तिः
किंच
पुनरन्यन्निबोध मे ॥ ८३ ॥
कथं
ज़ुंसःसंपुटमध्यस्थं
प्रणवोभयसंयुतम्।

नाम कृत्वा वरारोहे
प्रक्षिपेन्मधुरत्रये ॥ ८४ ॥

जुंस इत्यनेन प्राग्वत् प्रागनुलोमं पश्चात्तु प्रतिलोमं विन्यस्तेन संपुटीकृतं नाम पश्चात् प्रणवेन संपुटितं कुर्यादित्यर्थः । मधुरत्रयं प्राग्वत् ॥ ८४ ॥

इत्थं च

परां शान्तिमवाप्नोति
मृत्युरोगैर्न बाध्यते ।

साध्य इत्यर्थात् ॥

पुनर्मृत्युजयप्रकारान्तरमाह

भूर्जपत्रं समादाय
रोचनाया वरानने ॥ ८५ ॥
मातृकान्तरितं नाम
दूर्वाकाण्डेन चालिखेत् ।
तदभ्यन्तरगर्भे तु
स्वरैरन्तरितं कुरु ॥ ८६ ॥

पुनर्गर्भे समालिख्य
साध्यनाम वरानने।
ध्रुवेण वेष्टयेत्पश्चा-
द्धकारेण ततः प्रिये ॥ ८७ ॥
सकारं च क्षकारं च
लिखेच्च तदनन्तरम्।
पुनर्वेष्ट्य ठकारेण
मायाबीजेन सुव्रते ॥ ८८ ॥
अङ्कुशेन निरुध्येत
रक्षां मृत्युविनाशिनीम्।
स्वच्छन्दसहितां देवि
प्रणवेनादियोजिताम् ॥ ८९ ॥
वषड्जातिसमोपेतां
कर्पूरक्षोदचर्चिताम्।
गन्धपुष्पादिना पूज्य
प्रक्षिपेन्मधुरत्रये ॥ ९० ॥

गर्भे साध्यनाम। प्रणवेनादियोजितामपि

प्रणवान्तर्गर्भीकृतां विधाय स्वच्छन्दसहितां वषड्जातिसमोपेतां रक्षां कृत्वेति गर्भीकृतनाम्नः प्रणवस्य बहिरघोरं वषडन्तं परिवेष्टनया लिखेत् तच्च 'तदभ्यन्तरगर्भे तु स्वरैरन्तरितं कुरु'इति बहिर्विन्यस्तकादिक्षान्तमातृकाया अभ्यन्तरे षोडशभिः स्वरैरन्तःकृतैः परिमण्डलेन लिखितैर्व्याप्तं करणीयं यदाह मातृकान्तरितमिति। एतच्च सर्वं पुनर्ध्रुवेण वेष्टितं सत् क्रमेण वकारसकारक्षकारठकारैर्वेष्टयेत्। तदनु मायाबीजसत्केकारेण त्रिर्वेष्टयेत्। पश्चादष्टसु दिक्षु क्रोंकारेण रोधयेदिति व्यवहितवाक्यार्थसंगत्यनुसारेण चक्रमेतत्प्रदर्शितम् ॥ ९० ॥

अर्चयित्वा चैतत्सिक्थकेन मुटितं मधुरत्रये यस्य क्षिप्यते, तस्य

जायते परमा शान्ति-
नात्र कार्या विचारणा ।

निश्चितमतिनैतत्प्रयुक्तमभीष्टं साधयत्येव ॥

अथवा गुटिकां कृत्वा
कण्ठे बाहौ च धारयेत् ॥९१॥

यः

तस्य व्याधिर्न जायेत
इत्येवं भैरवोऽब्रवीत्।

गुटिकां कृत्वा इति जतुबद्धां कनकादि-भूषितां विधाय कण्ठे भुजे वा धारयेत्। चो वार्थे॥

गुटिकां विना विशिष्टमन्त्राभिमन्त्रितभोजनपानक्रमेण सततं क्रियमाणेन मृत्युजिद्विधिमाह

त्र्यक्षरं मूलमन्त्रं च
वषड्जातिसमन्वितम्॥ ९२॥
भोजनोदकपाने तु
मन्त्रयित्वाश्नतः सदा।
न तस्य जायते मृत्यु-
र्भैरवस्य वचो यथा॥ ९३॥

नेत्रमन्त्रचतुष्कलनाथाभ्यां वषडन्ताभ्यां भोजनपाने द्वे सततमभ्यवहरतो न मृत्युर्भवति॥ ९३॥

अथ विषादिहेतुर्यस्यापि मृत्युर्न, तं समादिशति

अथाहिना महादेवि
दूषितः साधको यदा ।

तदा

मूलमन्त्रसमोपेत-
मघोरं तत्र योजयेत् ॥ ९४ ॥

मूलमन्त्रः श्रीचतुष्कलः, तेन समोपेतं संपुटीकृतं, तत्रेति अहिदूषणप्रशान्तिनिमित्तम् । अस्यान्ते 'भगवन्विषं शमय २ हुंफट्' इति क्रूरजात्यन्त ऊहः प्रयोक्तव्य इत्यर्थात् ॥ ९ ॥

प्रयोगावसरे च

आत्मनो भैरवं रूपं
कृत्वा चैव सुदारुणम् ।
दंष्ट्राकरालविकटं
ज्वालामालोपशोभितम् ॥९५॥
सर्पैर्लम्बमानैः
खड्गहस्तं सुभीषणम् ।

पूर्वरूपसमोपेतं
सूर्यकोटिसमप्रभम् ॥ ९६ ॥
तेनाक्रान्तं महादेवि
दष्टकं तु विचिन्तयेत् ।
तज्ज्वालाभिः सुदीप्ताभि-
र्दग्धं संचिन्तयेद्विषम् ॥ ९७ ॥
तत्क्षणाद्देवदेवेशि
निर्विषः स तु जायते ।

कृत्वेति ध्यात्वा, सर्पैरिति हारकटकादिस्थै-रुपलक्षितं, पूर्वरूपं श्रीकोटराक्षसंबन्धि । अ-हिदूषितत्वं विषदूषितत्वोपलक्षणपरम् ॥

किंच

ग्रहेष्वेवंविधं ध्यानं
यः कुर्यात्
सः
मोचयेत्क्षणात् ॥ ९८ ॥

तेभ्योऽपस्मारादिग्रहेभ्यः साध्यमित्यर्थात् ।

अत्र च 'भगवन्नस्य साध्यस्य ग्रहं शमय शमय हुंफट्' इत्यन्तपूर्वोक्तमन्त्राभिमन्त्रितेनाम्भःकुसुमादिना साध्यं ताडयेदित्यर्थात् ॥ ९८ ॥

ध्यानासमर्थं प्रति विषशमनं कारुणिकत्वादोषधिप्रयोगैरप्यादिशति शंभुः

अथ ध्याने ह्यकुशलो
यदा कश्चिन्नरो भवेत् ।
तदागदैर्महादेवि
निर्विषं कुरुते क्षणात् ॥ ९९ ॥

दष्टं भक्षितविषं च ॥ ९९ ॥

अगदमाह

कुमारिद्वितयं गृह्य
नागिन्या तु सहैकतः ।
गोकर्णिकासितं मूलं
सोमाह्वामूलसंयुतम् ॥ १०० ॥

आमगोक्षीरसंपिष्टं
भक्षयेन्निर्विषो भवेत् ।

कुमार्याख्यौषधिः सफला वन्ध्या चेति द्विरूपापि, नागिन्या महागोनासाह्वया सह गोक्षीरपिष्टमित्येकः प्रयोगः। गोकर्णिका गिरिकर्णिका, सोमाह्वा सोमराजी, तयोः सितं मूलं गोक्षीरपिष्टमिति द्वितीयः, क्षीरेण पिष्टमप्येतद्घृतेन सह पाने नस्ये वा प्रयोक्तव्यम्। यद्वक्ष्यति

'अगदान्घृतसंयुक्तान् पिबेत्······।' (१०८)

इत्यादि ॥

किंच

गोनिम्बस्य च मूलेन
निर्विषत्वं प्रजायते ॥ १०१ ॥

गोनिम्बो भूम्यामलकी । क्वचित्तु ऐरण्डस्य मूलेनेति पाठः । अत्रापि आमगोक्षीरपिष्टत्वं स्थितमेव ॥ १०१ ॥

अश्वमारस्य मूलं तु
उदकेन तु पेषयेत् ।
पाने नस्ये प्रदातव्यं
तदा भवति निर्विषः ॥१०२॥

अश्वमारः करवीरकम् ॥ १०२ ॥

आरग्वधस्य मूलं तु
उदकेन च पेषयेत् ।
पाने नस्ये प्रदातव्यं
तदा भवति निर्विषः ॥१०३॥

आरग्वधमारोचकमिति प्रसिद्धम् ॥ १०३ ॥

मधुकस्य तु सारं य-
न्नस्ये पाने प्रयोजयेत् ।
निर्विषस्तु प्रजायेत
भैरवस्य वचो यथा ॥ १०४ ॥

मधुकस्य मधूकस्य सार आन्तरो भागस्तं द्वयोः प्रक्रान्तत्वात् उदकेन क्षीरेण वा पिष्ट्वा,

नस्ये पाने प्रदातव्यम् । मधुकं मधुयष्टिरित्यन्ये ॥ १०४ ॥

जम्बुलासिकमूलं तु
पाने नस्ये प्रयोजयेत् ।
निर्विषस्तु भवेद्देवि
नात्र कार्या विचारणा ॥१०५॥

जम्बुलासिकमूलं जम्बुवृक्षमूलम् । अत्रापि गोक्षीरपिष्टमिति स्थितमेव ॥ १०५ ॥

अथ विषानाक्रमणहेतुमगदगुटिकाप्रयोगमाह

षड्बिन्दुपटखर्जूर-
सूक्ष्मचूर्णं तु कारयेत् ।
मयूरपित्तसंयुक्तं
गुटिकां कारयेत्प्रिये ॥ १०६ ॥
त्रिलोहवेष्टितां कृत्वा
करे कण्ठे निधापयेत् ।
न विषं क्रमते तस्य
यश्च दष्टो महोरगैः ॥ १०७ ॥

षड्बिन्दुः प्राणिविशेषः । पटखर्जूरं शतपदी । गुटिकां कारयेदित्यनन्तरं तां चेति, निधापयेदित्यनन्तरं यत इति चाध्याहार्यम् । त्रिलोहं हेमरजतताम्रम् ॥ १०७ ॥

अगदप्रयोगे शेषविधिमाह

अगदान्घृतसंयुक्ता-
न्पिबेद्वै विषदूषितः ।
न विषं क्रमते तस्य
इति शास्त्रस्य निश्चयः ॥१०८॥

एतेष्वगदेषु वान्येषु वा पृथक्पृथक् कुण्डलीयगारुड्येकवीराबलामोटादिमूलविषयेषु निष्कम्पप्रतिपत्तिना प्रयुज्यमानेषु अविसंवादिता भवतीति दर्शयन् पटलमुपसंहरति

एवमन्येऽपि ये योगाः
स्वच्छन्देन विनिर्मिताः ।
कालाग्निर्नरकाश्चैव
पाताला हाटकेश्वरः ॥१०९॥
प्रद्याद्भावितात्मा च
सिद्ध्यन्ते नात्र संशयः ।

स्वच्छन्देनेति सर्वं हि परमेश्वरेण प्रवर्तितम्। यदुक्तं श्रीश्रीकण्ठ्यां

'प्रवर्तेतेश्वरात्सर्वं निवर्तेत तथेश्वरात् ।
ईश्वराधिष्ठितं सर्वं जगत्स्थावरजङ्गमम् ॥
महादेवात्परं नास्ति सत्यमेतन्न चान्यथा ।'

इति । च एवार्थे, भावितात्मैव प्रयुञ्जीतेत्यर्थः । पाटलिकी संगतिरदूर एव

'कालाग्निर्नरकाश्चैव पाताला हाटकेश्वरः ।'

इत्यादिना पटलान्तं कटाक्षयता ग्रन्थेन कृतेति शिवम् ॥

व्याधीनामगदं दिव्यमाधीनां मूलकर्तनम् ।
उपद्रवाणां दलनं महादेवमुपास्महे ॥

इति श्रीस्वच्छन्दोद्द्योते

नवमः पटलः समाप्तः ॥ ९ ॥